# Durga Stotram

# દુર્ગાસ્તોત્રમ્

## Document Information

Text title : durgAstotram from Bharatamanjari of Kshemendra

File name : durgAstotramBM.itx

Category : devii, kShemendra, stotra, durgA, devI

Location : doc_devii

Author : Kshemendra

Description/comments : kAvyamAlA 65. Bharatamanjari

Latest update : October 15, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# દુર્ગાસ્તોત્રમ્

દુર્ગસંતારિણીં દુર્ગાં તદા સ શરણં ગતઃ ।
મહેન્દ્રોપેન્દ્રભગિનીં દિવ્યૈસ્તુષ્ટાવ નામભિઃ ॥ ૧॥

નૌમિ કંસાસુરૈશ્વર્યતમઃપટલચન્દ્રિકામ્ ।
પૂર્ણચન્દ્રાનનાં દેવીં દુષ્ટસંમોહનક્ષમામ્ ॥ ૨॥

દીપ્તશૂલપ્રભાજાલભીષણાં લલિતાકૃતિમ્ ।
વેલ્લદ્વિષોલ્બણવ્યાલામિવ ચન્દનવલ્લરીમ્ ॥ ૩॥

મહિષન્યસ્તચરણાં શ્યામાં હારવિભૂષિતામ્ ।
સકાલિયહૃદાં ફેનહાસિની યમુનામિવ ॥ ૪॥

પાણિસંસક્તભુજગાભોગનીલાસિવલ્લરીમ્ ।
એકપદ્મોદરોદ્ભ્રચ્છદલિમાલામિવાજિનીમ્ ॥ ૫॥

મયૂરપક્ષાભરણૈઃ શબલૈર્મેચકપ્રભૈઃ।
સેવિતાં પ્રાવૃષમિવ સ્ફુરદિન્દ્રાયુધૈર્ઘનૈઃ ॥ ૬॥

કરાલકેશવિસ્ફારશુદ્ધસંચારલાલસામ્ ।
હિમાદ્રિશિખરોદ્ભૂતાં કાલાગુરુલતામિવ ॥ ૭॥

કવીન્દ્રમાનસાવાસરાજહંસીં સરસ્વતીમ્ ।
વિચિત્રમધુરોદારશબ્દાં ચારુપદક્રમામ્ ॥ ૮॥

સંસારમરુસંતાપનિર્વાપણસમુદ્યતામ્ ।
સંવિત્સમરસાનન્દસુધાસ્યન્દતરઙ્ગિણીમ્ ॥ ૯॥

રણસંરમ્ભસંભારગમ્ભીરારમ્ભવિભ્રમામ્ ।
નિશુમ્ભશુમ્ભાવષ્ટમ્ભભીતસંભાવિતામરામ્ ॥ ૧૦॥

સંધ્યામવન્ધ્યાં વિન્ધ્યાદ્રિવાસિનીં વાસવાનુજામ્ ।
શશિખણ્ડશિખણ્ડાઙ્કાં મુણ્ડમણ્ડલમણ્ડિતામ્ ॥ ૧૧॥

કુલ્લોત્પલવનશ્યામાં કુલ્લોત્પલવિલોચનામ્ ।
ગમ્ભીરનાભિકુહરામિભકુમ્ભનિભસ્તનીમ્ ॥ ૧૨॥

ધન્યાં કાત્યાયની ચણ્ડાં ચામુણ્ડાં ખણ્ડિતાહિતામ્ ।
શર્વાણી શર્વરીં શર્વા સિદ્ધગન્ધર્વસેવિતામ્ ॥ ૧૩॥

કાલસંકર્ષિણીં ઘોરાં ત્રિજગરામલાલસામ્ ।
કમલાસનકઙ્કાલમાલાકલિતશેખરામ્ ॥ ૧૪॥

શિવાં શિવપ્રદાં શાન્તાં શિવકાન્તાં શતાનનામ્ ।
ત્રિનેત્રાં સૌમ્યવદનાં મદનારિમદપ્રભામ્ ॥ ૧૫॥

સ્ફીતફેનસુધામ્ભોધિદુકૂલાં રત્નમેખલામ્ ।
કરાકલિતહેમાદ્રિમાતુલઙ્ગાંશુપિઙ્ગલામ્ ॥ ૧૬॥

અક્ષસૂત્રીકૃતાવૃત્તનક્ષત્રમણિમાલિકામ્ ।
પાણિસક્તસુધામ્ભોધિપૂર્ણબ્રહ્માણ્ડકપરામ્ ॥ ૧૭॥

સંવિત્પ્રકાશવિષદવ્યાકોશાકાશદર્પણામ્ ।
શેષાદિકુલભોગીન્દ્રહારકેયૂરકઙ્કણામ્ ॥ ૧૮॥

તારકામૌક્તિકસ્મેરશશિમાર્તણ્ડમણ્ડલામ્ ।
ત્રિશૃઙ્ગરત્નશૈલેન્દ્રવિટઙ્કમુકુટોજ્જ્વલામ્ ॥ ૧૯॥

કલ્લોલલોલખઃસિન્ધુધવલોષ્ણીષભૂષિતામ્ ।
સેન્દ્રાયુધક્ષયામ્ભોદમાયૂરચ્છત્રવિભ્રમામ્ ॥ ૨૦॥

કન્દાગ્રકુણ્ડલિતનાભિમૃણાલદણ્ડ
    હૃત્પુણ્ડરીકનિબિડામૃતપાનશૌણ્ડામ્ ।
ભૃઙ્ગાઙ્ગનામિવ સદોદિતનાદશક્તિ-
    સંવેદ્યવેદ્યજનની જનનીં પ્રપદ્યે ॥ ૨૧॥

ઇતિ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતં દુર્ગાસ્તોત્રં સમ્પૂર્ણમ્ ।

હરિવંશ બાણયુદ્ધમ્ શ્લોકાનિ ૧૩૧૩-૧૩૩૩

*Durga Stotram*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*